CAREERINDIA

# ಕರ್ನಾಟಕ ಶಾಲಾ ಪರೀಕ್ಷೆ ಮತ್ತು ಮೌಲ್ಯನಿರ್ಣಯ ಮಂಡಲಿ
**ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು – 560 003**

**KARNATAKA SCHOOL EXAMINATION AND ASSESSMENT BOARD**
**Malleshwaram, Bengaluru – 560 003**

## 2024-25ರ ಎಸ್.ಎಸ್.ಎಲ್.ಸಿ. ಮಾದರಿ ಪ್ರಶ್ನೆಪತ್ರಿಕೆ-2
## S.S.L.C. MODEL QUESTION PAPER-2 : 2024-25

## ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ
## Subject : First Language — SANSKRIT
## प्रथमभाषा — संस्कृतम्

**ವಿಷಯ ಸಂಕೇತ : 16-S** | **Subject Code : 16-S**

ಸಮಯ : 3 ಗಂಟೆ 15 ನಿಮಿಷಗಳು ] | [ Time : 3 Hours 15 Minutes

ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] | [ Max. Marks : 100

---

***ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ಒಟ್ಟು 45 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
3. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
4. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ನೀಡಲಾಗಿದೆ.

***परीक्षार्थिनां सामान्यसूचना:***

1. अस्मिन् प्रश्नपत्रे पञ्चचत्वारिंशत् (45) प्रश्नाः सन्ति ।
2. प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
3. प्रश्नानाम् अधिकृताः अङ्काः दक्षिणपार्श्वे लिखिताः सन्ति ।
4. प्रश्नपत्रमुत्तरितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । तत्र पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

www.careerindia.com

CAREERINDIA



**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **6 × 1 = 6**

1. 'पङ्क्तिरथः' अस्य समानार्थकपदम् इदं भवति ।

   (A) दिलीपः (B) अजः

   (C) दशरथः (D) रघुः

2. 'मार्दवम्' अस्य विरुद्धार्थकपदम् इदं भवति ।

   (A) मृदुत्वं (B) काठिन्यम्

   (C) मधुरम् (D) मालिन्यम्

3. 'पतिः' अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

   (A) जाया (B) भार्या

   (C) सहधर्मिणी (D) पत्नी

4. 'दृश्यते' अत्र एषः लकारः वर्तते ।

   (A) लट् लकारः (B) लिट् लकारः

   (C) लङ् लकारः (D) लोट् लकारः

5. 'मित्राणि' अत्र एषा विभक्तिः वर्तते ।

   (A) तृतीया विभक्तिः (B) द्वितीया विभक्तिः

   (C) चतुर्थी विभक्तिः (D) पंचमी विभक्तिः

6. '<u>शल्यकर्णौ</u> रथारोहणं कुरुतः ।' अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति ।

   (A) के (B) किम्

   (C) कौ (D) कैः

www.careerindia.com

CAREERINDIA



**II. चतुर्थं पदं लिखत।** **4 × 1 = 4**

7. पैथागोरस् सिद्धान्तः – बोधायनकात्यायनौ :: बृहत्संहिता – .................... ।

8. शरणागतः – राजारामः :: पराजिता – .................... ।

9. सर्वलोकशरण्यः – श्रीविष्णुः :: उत्तानपादः – ................ ।

10. मेधावी – न कारान्तः :: मन्त्रवेत्ता – .................... ।

**III. एकवाक्येन उत्तरं लिखत।** **7 × 1 = 7**

11. कः भूमिं परितः प्रदक्षिणं करोति ?

12. चम्पूविषये प्रसिद्धा अभियुक्तिः का ?

13. भारत माता कैः पूजिता ?

14. मानवः कथं निर्वेदम् आदत्ते ?

15. के मुहुर्मुहुः परिभवं प्राप्नुवन्ति ?

16. बाल्ये शास्त्रि महोदयस्य गृह परिसरः कीदृशः आसीत् ?

17. भोजः कुत्र हन्तव्यः ।

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत।** **4 × 2 = 8**

18. बुद्धिसागरः मुञ्जं किं प्राह ?

19. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?

20. भीष्मेण दैवपुरुषकारयोः विषये किमुक्तम् ?

21. हिमलिङ्गं कदा दर्शनयोग्यं भवति ? कौ अमरत्वं प्राप्तवन्तौ ?

www.careerindia.com

CAREERINDIA



**V. सूचनानुसारम् उत्तरं लिखत ।** **4 × 2 = 8**

22. सन्धिं विभज्य नाम लिखत ।

 a) ता गच्छन्ति ।

 b) नाम्भः ।

23. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

 a) यथाशक्ति ।

 b) धनधान्यतैललवणानि ।

**अथवा**

समासं कृत्वा समासनाम लिखत ।

 a) कृतं भोजनं येन सः =

 b) गृहं गृहं प्रति =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।

 a) भोजनं कृत्वा गच्छति ।

 b) पुष्पेण विकसितव्यम् ।

25. प्रयोगपरिवर्तनं कुरुत ।

 a) बालकाः पाठं पठन्ति ।

 b) रामेण पत्रं लिख्यते ।

www.careerindia.com

CAREERINDIA



**VI. संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

26. ದೀಪವು ಬತ್ತಿಯಿಂದ ಎಣ್ಣೆಯನ್ನು ತೆಗೆದುಕೊಂಡು ಉರಿಯುತ್ತದೆ. ಎಣ್ಣೆ ಖಾಲಿಯಾದಾಗ ದೀಪವು ಆರಿಹೋಗುತ್ತದೆ.

Lamps draws oil from the wicks and burns. Lamps lits off when the oil is exhausted.

**VII. कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 × 2 = 2**

27. ताः बालिकाः ह्यः पाठान् समीचीनतया अपठन् । अद्य परीक्षां उत्तमतया लिखन्त्यः सन्ति ।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **4 × 3 = 12**

28. संस्कृतेनैव संस्कृतिरपि सुरक्षिता ।

कः पाठः ? कः अवदत् ? केन संस्कृतिः सुरक्षिता ?

29. ममाप्यस्ति कौतूहलमेनं वृत्तान्तं श्रोतुम् ।

कः पाठः ? कः अवदत् ? कस्य वृत्तान्तः ?

30. सहसा वह्निमाविश !

कः पाठः ? के ऊचुः ? कम् ऊचुः ?

**अथवा**

सः महर्षिः धर्मात्मा उदारश्च ।

कः पाठः ? कः अवदत् ? धर्मात्मा कः ?

31. अहमस्य प्रदास्यामि परमं वरमद्भुतम् ।

कः पाठः ? कः वरं ददाति ? कस्मै वरं ददाति ?

www.careerindia.com

CAREERINDIA



**IX. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **2 × 3 = 6**

32. कालिदासः ।

33. वेदव्यासः ।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **3 × 3 = 9**

34. यथा नद्यः स्यन्दमानाः समुद्रेस्तं गच्छन्ति नाम रूपे विहाय ।
तथा विद्वान् नाम रूपात् विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ।।

35. एष मातुर्वियोगाच्च क्षुधया च भृषार्दितः ।
रुरोद शिशुरत्यर्थं शिशुः शरवणे यथा ।।

36. शृङ्गार हास्य करुणाः रौद्रवीरभयानकाः
वीभत्साद्युत शान्तश्च नव नाट्ये रसास्मृता ।।

**अथवा**

यत्र कुत्र वा वयं समग्रभारते स्थिताः
भाषयापि धर्मतश्च भिन्नमार्गमाश्रिताः ।
आदितश्च मध्यतस्तथान्ततश्च भारताः
भारतीयभावनेति वृद्धिमेतु भारते ।।

**XI. वाक्ये विद्यमानम् अलङ्कारं सलक्षणं समन्वयत ।** **1 × 3 = 3**

37. मधुरं मधु पीयूषं तस्मातस्मात् कवेर्वचः ।

**अथवा**

ज्ञानामृतं पीत्वा तुष्टः ।

www.careerindia.com

CAREERINDIA



**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

38. सांसारिकार्तिहरणं शरणं प्रपद्ये ।

**XIII. पद्यं पूरयत ।** **1 × 4 = 4**

39. सुखस्य ......................................................................

........................................................................... ।

...........................................................................

................................................................ हि लोकः ।।

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।**

**3 × 4 = 12**

40. वृत्रवधोपायं ज्ञातुम् आगतान् देवान् ब्रह्मदेवः किम् अवदत् ?

41. भारतं संरक्षितुं सन्नद्धः योद्धा हिमवान् कथं ? इति नगाधिराज पाठानुसारं लिखत ।

42. युधिष्ठिरं प्रति भीष्मस्य उपदेशं ''भीष्मोक्तयः'' पद्यानुसारेण संगृह्य लिखत ।

**अथवा**

वत्सराजः भोजं कथं रक्षति ?

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 4 = 4**

43. विज्ञानक्षेत्रे अत्युपयुक्तं बुद्धियुक्तं विकसितं च यन्त्रमेव सङ्गणकयन्त्रम् । अस्य आविष्कारेण सर्वक्षेत्रेषु महती प्रगतिः अभवत् । आधुनिककाले तु सङ्गणकयन्त्रेण विना किमपि कार्यं न



www.careerindia.com

CAREERINDIA



भवति । सर्वत्र अस्य यन्त्रस्य व्यापकः प्रभावः दृश्यते । सङ्गणकस्य स्मरणशक्तिः गणनाशक्तिच असाधारणा संस्कृतभाषा सङ्गणकयन्त्रे सुष्टु अन्वेति ।

**प्रश्नाः**

i) विज्ञानक्षेत्रे अत्युपयुक्तं यन्त्रं किम् ?

ii) कस्मिन् काले सङ्गणकयन्त्रेण विना किमपि कार्यं न भवति ?

iii) कस्य स्मरणशक्तिः असाधारण ?

iv) का भाषा संगणक यन्त्रे सुष्टु अन्वेति ?

**XVI. पत्रं लिखत ।** **1 × 5 = 5**

44. यादगिरिमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा अनारोग्य निमित्तं एकस्य दिनस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

**अथवा**

प्रवासार्थं धनं प्रेषयितुं निवेद्य पितरं प्रति पत्रं लिखत ।

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 × 5 = 5**

45. परिसर संरक्षणेन देशसंरक्षणं ।

**अथवा**

राष्ट्रियोत्सवः ।

www.careerindia.com